No. ४५५०

Title शुल्व सूत्र विवरणं

Author कात्यायनः महीधरः

Extent २८ Age ×

Subject सूत्र प० परिशिष्टं

शुल्वसूत्रविवरणम्

~~५५५५~~ ४५५०

4550

Starting from 4 to 32

1 to 3 MISSING.

F = 29

ष्मान्याः शोणोरज्ज्वागो ऽक्ष्णया संसरतीति पूर्ववद्व्याख्या। समचतुरस्रस्य श्रोण्यंसस्थानमाह। प्रमा
णार्धेन समचतुरस्रस्य शंकुः समचतुरस्रस्य तुल्यायामविस्तारस्य क्षेत्रस्य प्रमाणार्धेनायामार्धे शंकु
र्देयः। रज्ज्वा न्यासरज्ज्वोरर्धे देयः श्रोण्यंसस्य विच्छेदाय। निरंछनं तत्न्यासरज्ज्वोश्चतुर्थे शोण्यन्ते। दीर्घच
तुरस्रस्य श्रोण्यंसमानमाह। शास्त्रवदर्धे दीर्घचतुरस्रस्य॥ दीर्घचतुर[illegible]स्रस्य तु शास्त्रवदर्धे
शंकुर्देयः। श्रोण्यंसपरिच्छेदाय। शास्त्रेणोक्तमानं त्रिंशन्नं तत् शास्त्रवत्। तस्यार्धे मध्ये शंकुः। महा
वेद्यां चतुर्विंशतिपुरस्तादित्युक्तं। नवतिर्यजितिसदसि। तदर्धे द्वादशांस्तु वेद्यां सार्ध चतुष्टये च सदसि
शंकुर्देयः। एवमन्यत्रापि शाकटमुखस्य चैवं। शाकटमुखस्य वयनादौ शाकटामुखवा कृते सम्यक् स्विदे
वस्य शास्त्रोक्तविस्तारार्धे श्रोण्यर्थं शंकुर्देय इत्यर्थः। एतेन प्राग्वंशवेदिमानानि व्याख्यातानि॥
एतेन समचतुरस्रदीर्घचतुरस्ररज्जुमानकथनेन प्राग्वंशस्यत विद्धिनादेः वेदेश्चैष्टिकसौमिक्याद
मानानि व्याख्यातानि। समचतुरस्रं प्राग्वंशं भवति। वेदिस्तु चतुर्मुखा। शालामानं च। शालामानम
प्येतनैव व्याख्याते। शालायादीर्घचतुर[illegible] राया माद्याक[illegible]स्माभ्या तु शा

यास्मवेषूक्तां तामेवात्र सूत्रकारो ब्रवीति । सैव सोमे प्रागामयतायामासि प्रवर्त्यां विस्तृतायतः
या सा प्रोक्ता । पूर्वगायतेत्यादि स्त्रिद्ध्रवाहि नदगा यतालुशालासत्रेषूक्तां तामेवात्र सूत्रकारो ब्रुवी-
ति । सैव सोमे प्रागायताद्याहारा स्त्रिद्धवत् । तत्रोदीचीप्राचीवत् । तत्र शालायां नैदीचीप्राचीवत्साध्य
नीया । तत्तरायतत्वात् शालायाः आदावुदीच्यां रज्जुन्यासं कृत्वा रज्जुं निहत्य पश्चात्तिर्यङ्मानं
साध्यमिति चावश्य । सदस्यप्येवं । सदसो पि शालावन्मानं कार्यं । सदसो पि दीर्घं बहुत्वस्त्वं यतः ।
रज्ज्वा प्यादावुदीचीप्राचीव साध्या । परिमाणमाह । अपरिमितं प्रमाणं द्रूयः । यत्र यत्रापरिमि-
तशब्दः श्रूयते तत्र तत्र प्रमाणादुक्तमानात् न्यूनाधिकं मानं ग्राह्यं । यतोऽपरिमितशब्दो बहुत्व-
वाची । बहुत्वं चापेक्ष्य ग्राह्यं । अपरिमितां वेति यदि श्रुतिवेदायुक्तं । अपरिमितेष्टक इति यद्ब्र-
यनेनोक्तं । एतद्द्वयं विनोक्तमानाधिकवाच्यपरिमितशब्दः । इह श्रुतिवेद्यां च यन्नेव मानान्नावाधो ॥५॥
ऽपरिमितशब्द इति बोध्यं । एवं सर्वत्रापि पूर्वसूत्रे व्यवस्थामाह । प्रमाणे शास्त्रं प्रमाणं निरुक्ति ॥६॥
वक्त्रोः । निरुक्तिवक्त्रोः द्वयोः स्वरूपे देवप्रमाणे परिच्छेदे प्रमाणं शास्त्रमेव नान्यत् । ह्रासेव

दौव चास्योक्तएवकुशासोव द्विविर्ग्याग्यानस्वेच्छया। यथाष्टविधादिचयनेषु पुरुषमात्रान्युद्धयेनवद्भिः। य
थावपपे-अरत्निप्रिरेवो छुयः। सोचामणीवेद्या यथासौमिकीवेदीतोह्रासः। सोपि प्रक्रमतृतीयेन मानं
कर्त्तव्यं कार्यः। योगश्च। योगो नाम युक्तिः। युक्तिरप्याश्रयणीया। युक्त्याह्रासवद्धीविधेयेना। द्विकन्यूने।
इतरस्य वितृतीये दक्षिणत इत्येतद्व्याख्यानम्। इतरस्य वितृतीये दक्षिणत इति यद्दक्षिणा ग्निंप्रकल्प
कात्यायनेनोक्तं। एतत्तु व्याख्यामः॥ विविच्य कथयिष्यामः। इति ज्ञातमाह। गार्हपत्याहवनीययोरंतरं षड्
सप्तधा वागंतुसमं वेधा विभज्यापरवितृतीयलक्षणेन दक्षिणायम्यतास्मिन्नग्निः। गार्हपत्याहवनीय
योरंतरं गार्हपत्याहवनीययोर्येन मध्यस्थानेन तयोर्मध्यभागं देवमितरज्जुं षड्भागं सप्तधा वा कृत्वा षड्
भागं सप्तभागं वा विधाय योजनयथा पि-आगंतुसमे-प्रागंतुना वर्द्धिते भागेन सह यथा तथा षड्भागपक्षे
षष्ठं भागं विवर्द्ध्य सप्तधापक्षे सप्तम भागं विवर्द्ध्य विवर्द्धितभाग सहितां तां मध्यरज्जुं द्वेधा विभज्य त्रि
भागं कृत्वा तत्र तृतीयेतृतीये भागे सविह्नं कृत्वा अपरवितृतीयलक्षणेनापरे पश्चिमे भागे तृतीये
य धृत्वा लक्षणं विहूं तत्रध्वजवारज्जुं ध्रुवांस पाशौ गार्हपत्याहवनीयमध्यस्थितशंकौ निधायाय परवितृती

यविवृहन दक्षिणाद् दक्षिणस्यां दिशि आयम्याकृष्यत स्मिन्नग्निः । आकृष्टत्तृतीयभागविहृतस्य षष्ठेन भू
भागेऽग्निर्दक्षिणाग्निः । दक्षिणाग्नेर्मध्यस्थं कुर्यादित्यर्थः । पक्षद्वये षो डश विभागपदोत्तमोय [illegible] तस्मात्र
5 पार्श्वमानीति र्यष्टिलान्यौ समे स्यातां । तद्यत्कल्पसूत्रे प्राचिसममविशेषः । सप्तधा भागपदे कृते तयोर
न्यमन्तरं स्यात् । उत्करस्थानमाह । विपर्यस्योत्तरत उत्करः । विपर्यस्य पाशौ विपर्यस्य विपरीतौ कृत्वा
बोधा सप्तधा वा विभज्य प्राग्जंतुभागसहितवर्द्धित त्रिभाग विहितरज्जुपाशौ विपरीतौ कृत्वा पूर्ववत्तृतीय
भागविहृतेनोदगाकृष्य विहृतस्य षष्ठेन भागेनोत्करः कार्यः । उत्करो नाम पांसुसमूहितवेद्यादितृणाधूलि-
पुंजः । पत्न्यन्तरमाह । अपि वोत्तर त्रिभागेन यावज्ज्ञापस्य वा द्वैसम चतुरस्रं कृत्वा श्रोण्यामग्निः । अप्रविश्याय
वैदक्षिणाग्निः कार्यः । अंतर त्रिभागेन यावद् अंतरे गार्हपत्याहवनीययोर्मध्ये यावद्रज्जुः सा त्रिभागो
नात्रिधा विभज्य स्वतृतीयभागेनोना कार्या । तया रज्ज्वा करस्यापूर्वार्द्धे आहवनीयमध्यात्पश्चिमस्मा
गे सम चतुरस्रमुक्तविधिना कार्यं । तस्य श्रोण्यां दक्षिणश्रोण्यामग्निर्दक्षिणाग्निर्दक्षिणाग्नेर्मध्यमि ॥५॥
त्यर्थः । कार्य इति शेषः । विपर्यस्योत्तरांस उत्करः । विपर्यस्य वैपरीत्येन चतुरस्रं कृत्वा पश्चिमार्द्धे गार्हप
त्यमध्यात्पूर्वभागे तृतीयभागेन यस्या [illegible] चतुरस्रं कृत्वा तस्य चतुरस्रस्योत्तरांस

सेत्र करः कार्यः। इति श्रौतसूत्रेविवरणेमहीधरविरचितौ प्रायश्चित्तादिकथनंनामप्रथमाकंडिका [redacted] ग
मत्॥१॥ रथमात्र्युत्तरेति वरुणप्रघासे रथमात्र्युत्तरवेदिः श्रूयते। तन्निरूपणायाह। अंगुलैरथसंमि
तायाः प्रमाणं। रथसंमितायावेदेः प्रमाणं अंगुलैः कृत्वावक्ष्यामीति शेषः। रथकारशास्त्रेऽङ्गुलैरे
वरथमानस्योक्तत्वात्। तच्चाष्टाशीतिशतमीषा। ईषाशब्देनरथगतं पूर्वापरायतं काष्ठमुच्यते। तद
ष्टाशीत्यधिकमंगुलशतमितंभवति। चतुरंगुलन्यूनाष्टहस्तप्रमितमित्यर्थः। तेनवेदेः पूर्वापराया
मएतावानिति [redacted]नावः। चतुःशतमक्षः। रथस्यपश्चाद्भागे तिर्यग्गतंकाष्ठमक्षशब्देनोच्यते। ततश्चतुः
शतंचतुरंगुलाधिकमंगुलशतमितं [redacted] अष्टांगुलाधिकंहस्तचतुष्टयमित्यर्थः। तेनवेदेः श्रोणीमानंतिर्य
कःआयामश्चतुरधिकशतांगुलमितइतिभावः। षडशीतिर्युगं। वृषभस्कंधोपरिदीयमानंकाष्ठं
युगं। ततःषडशीतिरंगुलानि। द्व्यंगुलोनाश्चत्वारोहस्ताः। तेनवेदेः प्राक्तिर्यगायामः षडशीत्यं
गुलइतिभावः। चत्वारोष्टकाः शम्या। चत्वारोष्टकाद्वात्रिंशदंगुलानिशम्यामानं। युगच्छिद्रप्रवेशा
र्हंकाष्ठंशम्या। साष्टांगुलाद्विकहस्तमिता। शम्यावालवालमानंलक्षयति। दिक्स्रक्तिपुरुषमात्रंमि
मीतेइतिपित्र्यमेधेश्रूयते। तस्यायमर्थः। दिक्स्रक्तयःकोणायस्यतत् दिक्स्रक्तिदिक्कोणमित्य

र्थः। अस्मिन्ग्रंथे तु विदिक्कोणस्य चतुरस्रस्य प्रकारस्तेन इदानीं द्विकोणं चतुरस्रं वक्तुमाह। ये
न कृतां द्विपुरुषं समचतुरस्रं कृत्वा करणीमध्येषु शंकवः समाधिः। येन कृतां पितृमेधे द्विपुरुषं
पुरुषद्वयदैर्घ्यपरिच्छेदकं समचतुरस्रं कृत्वा करणीनां चतसृणां रज्जूनां मध्येषु मनाजेषु शं
कवः स्थाप्याः स्युः। समाधिः समाधानं प्रकारो विदिक्कोणचतुरस्रस्य। समचतुरस्रस्या
र्द्धतया रज्जुर्द्विकरणीति वक्ष्यमाणप्रकारेण पुरुषमात्रसमचतुरस्रस्य कोणसूत्रमानेन सम
॥६॥ चतुरस्रे कृते द्विपुरुषदैर्घ्यं तत्समचतुरस्रं भवति। तस्य करणाय चतस्रः। पार्श्वरज्जुद्वयं दक्षिणो
त्तरदिग्वर्त्तमानं। तिर्यग्रज्जुद्वयं पूर्वापरदिग्वर्त्तमानं। एवं रज्जुचतुष्टयमध्येषु चतुरः शंकून्
दत्वा तेषु चत्वारि सूत्राणि पातयेत्। एवं विदिग्गतकोणं समचतुरस्रं भवतीत्यर्थः। ग्रंथेऽस्मिन्न का-
रार्थं पंचरज्जुसंज्ञा आह। करणीतत्करणीतिर्यङ्मानीपार्श्वमान्यक्ष्णयेति रज्जवः। करणी तत्क
रणी। तिर्यङ्मानी। पार्श्वमानी। अक्ष्णया। एताः पंचरज्जूनां संज्ञाः। तत्र क्रियते क्षेत्रपरिच्छेदो नयेति
करणी प्राचीसूत्रस्याम्यरज्जुः। तस्यां दत्तायां चतुरस्रमध्ये द्विगुणं भवति। ततो देता
पंक्तिप्रथम तत्क्षेत्रं द्विगुणादि क्रियतेऽनया सा तत्करणी। द्विकरणी। त्रिकरणी चतुःकरण्यादिः। तिर्यक्
हेठनीन श्रोण्योः समसूत्रं मीयतेऽनया तिर्यङ्मानी। श्रोण्याः ... यो तिर्यग्वर्त्तमानं रज्जुद्वयं पार्श्वमा

येतिकोणस्तम्भरज्जुः। पार्श्वयोश्चैतासंज्ञा ग्रंथादौ वक्तव्याप्यासत्तथापि इतस्तासां व्याकुल्ये नोपयोगादत्रैवोक्ता।
एवं तत्रास्थितो न्यायः सर्वत्रोपयोगीति ज्ञापयितुमिति भावः। दशपदोत्तरवेदिर्भवतीति सोमे श्रूय
ते तत्साधनार्थमाह। पदं तिर्यङ्मानी त्रिपदा पार्श्वमानी तस्याक्ष्णयारज्जुर्दशकरणी। तस्येति पदश्रवणा
घस्येति पदस्याध्याहारः। यस्य क्षेत्रस्य तिर्यङ्मानी दक्षिणोत्तरायतं सूत्रं पदं पदप्रमाणं भवति। पादं चांगु
जं पदं। यस्याश्च पार्श्वमानी तिर्यङ्मान्या एकतरप्रान्तात् प्रसारितं प्रागपरायतं सूत्रं त्रिपदा त्रिपदपरिमितं सा
र्धहस्तायतं भवति। तस्य क्षेत्रस्याक्ष्णयारज्जुः कोणसूत्रं नूतना तिर्यङ्मान्यपरप्रान्तात् पार्श्वमान्यन्तपर्यं
तं नीता रज्जुर्दशकरणी भवति। दशपदक्षेत्रफलकस्य चतुरस्रस्य करणी षट्त्रिंशदंगुलसूत्रा प्राचीसू
त्रपरिमाता भवतीत्यर्थः। चयने चत्वारिंशत्पदोत्तरवेदिर्भवतीत्यपि श्रूयते तदर्थमाह। द्विपदा तिर्यङ्मानी
षट्पदा पार्श्वमानी तस्याक्ष्णयारज्जुश्चत्वारिंशत्करणी। यस्य क्षेत्रस्य तिर्यङ्मानी दक्षिणोत्तरसूत्रं
द्विपदा पदद्वयमिता। पार्श्वमानी प्रागायतं सूत्रं षट्पदा पदष[illegible]मिता। तस्य क्षेत्रस्याक्ष्णयारज्जुः को
णसूत्रं चत्वारिंशत्करणी। चत्वारिंशत्पदक्षेत्रस्य चतुरस्रस्य साधिकास[illegible]मिता रज्जुर्भव

तीत्यर्थः। युगमात्रौ वेति चयने सोमे च युगमात्रो त्तरवेदिः श्रूयते। शम्यामात्री मिति करुणा च वासे शम्या
मात्र्युत्तरवेदिः श्रूयते। तत्प्रमाणद्वयं म यानि हितमित्याह। उपदिष्टं युगप्रमाणं शम्याप्रमाणं च दर्श
नात्। दर्शनादुत्तरवेदिप्रमाणस्य तत्र यथादर्शनात्। युगप्रमाणं षडशीति युगमित्युपदिष्टं। शम्या
प्रमाणं च द्वात्रिंशकाः शम्येत्युपदिष्टं कथितं। द्वे च परिशिष्टे दार्थ्यं किं विदाह। दीर्घचतुरस्रस्याकृ
यारज्जुस्तिर्यङ्मानी या पार्श्वमानी यत् पृथग्भूते कुरुत स्तदुभयं करोतीति क्षेत्रज्ञानं। दीर्घचतुर
स्रस्य तिर्यङ्मानी पार्श्वमान्यौ रज्जू पृथग्भूते स्तो यत् क्षेत्रं यत्फलकं क्षेत्रं समचतुरस्र द्वयं
कुरुतः। तदुभयमपि मिलिते दीर्घचतुरस्रस्याक्ष्णया पाकोण सूत्रकृता रज्जुः करोति तौ क्षेत्र
ज्ञानं क्षेत्रमान प्रकारो ज्ञातव्य इत्यर्थः। यथोक्तं। पदं तिर्यङ्मानी त्रिपदा पार्श्वमानी तस्याक्ष्णयार
ज्जुर्दशाकरणीति दीर्घचतुरस्रं। तत्र पदप्रमाणा तिर्यङ्मानी पदमात्रक्षेत्र फलकं चतुरस्रं करोति
। पार्श्वमानी तु त्रिपदा सा नवपद क्षेत्र फलकं चतुरस्रं करोति। एवमुभयं मिलितं दशपद क्षेत्र
फलकं चतुरस्रं जातं। तच्च दीर्घचतुरस्रस्य पदमात्र तिर्यङ्मानी त्रिपद पार्श्वमानी न्यां कृत

७ ॥९॥

स्या दृत्तया रज्जुरेवकरोतीति द्वेयं । तिर्यङ्मान्याः पार्श्वमान्याश्च वर्गौ कृत्वा तावेकीकृत्य तस्य
मूलेन समानीते दीर्घचतुरस्रस्य कर्णसूत्रमानमेव भवति । यतः समद्विगुणानं वर्गः । मूलानय
यनेन कृत लब्धोत्या द्विषमान्हतिमिति लीलावती द्रष्टीकेन बोध्यं । एवमन्यत्रापि क्षेत्रज्ञानप्रकारः ।
एवं क्षेत्रज्ञानप्रकारं संक्षेपतो निरूप्याथ द्विगुणयादि क्षेत्रप्रकारमाह । समचतुरस्रस्या दृत्ता
यारज्जुर्द्विकरणी । समचतुरस्रस्य क्षेत्रस्य याऽदृत्तया रज्जुः कर्णसूत्ररूपा रज्जुः
साद्विकरणी । द्विगुणक्षेत्रस्य प्रावी सूत्रप्रमाणमित्यर्थः । यथा हस्तमात्रसमचतुरस्रस्य
कर्णसूत्रं चतुर्विंशत्यंगुलानि किंचिन्न्यूनानि तान्येव द्विहस्तचतुरस्रस्य प्रमाणं । एवं तत्र
माणरज्जुर्भवतिता वं तस्तावंतो वर्गा भवंतिता समस्येदितिवक्ष्यमाणत्वात् । यथा हस्तमा
त्रे समचतुरस्रे चतुर्विंशत्यंगुलप्रमाणा रज्जुस्तत्र चतुर्विंशतिश्चतुर्विंशत्या गुणिता ष
ट्सप्तत्यधिकापंचशतानि भवंति । सा द्विगुणिता द्वापंचाशदधिकैकादशशतानि स्यात् । त
स्यामूलं किंचिन्न्यूनचतुस्त्रिंशदंगुलानि । तानि [illegible] चतुरस्रायाममानं । एवमग्रे
=पं. २३ प. ७ पृ. ९ लिहा १ [illegible] अं १

पि त्रिहस्तादौ। एकहस्तवर्गे त्रिगुणिते हि कृत्वा तन्मूलानयनेन तत्तद्यामप्रमाणं बोध्यं। द्वि
करणीसाधने प्रकारान्तरमाह। करणीं तृतीयेन वर्द्धयेत् स्वचतुर्थेनात्मचतुर्विंशोनेन सवि
शेषस्तति विशेषः। करणीमेकहस्तकोष्ठयामं तृतीयेन वर्द्धयेत्। स्वतृतीयांशेन वर्द्धयेत्। त
स्य चतुर्थेन वर्द्धयेत्। तदिति सामान्येन नपुंसकनिर्देशः। तं तृतीयांशं स्वचतुर्थेन तृतीयांशा
स्य यश्चतुर्थो भागस्तेन वर्द्धयेत्। किंभूतेन स्वचतुर्थेन। आत्मचतुर्विंशोनेन। आत्मनश्च
तुर्थांशस्य यश्चतुर्विंशो भागस्तद्रहितेन। स्वचतुर्विंशांशरहितेन स्वचतुर्थभागेन तं तृतीया
8 शं वर्द्धयेदित्यर्थः। यथा। हस्तमितसमचतुरस्रस्य करणी चतुर्विंशत्यंगुलस्वरूपा। सा
त्रिगुणी क्रियते यदा तदा तां तृतीयांशेन वर्द्धयेत्। चतुर्विंशतेस्तृतीयांशोऽष्टावंगुलानि। = ॥८॥
एवं द्वात्रिंशदंगुलानि जातानि। तत्तृतीयांशोऽष्टांगुलात्मकः स्वचतुर्थेनांगुलद्वयेन पुनर्वर्द्धि
तस्तदा चतुस्त्रिंशदंगुलानि जातानि। स्वचतुर्थेन कीदृशेनात्मचतुर्विंशोनेन। एवमंगु
= लद्वयस्य चतुर्विंशो भागोऽयं कान्तयं। [illegible] नंवाला गुंच। तावताहीनेनां

गुलद्वयेन तृतीयो भागो वर्द्धितः। एवं वसति द्विहस्तकरण्येतावती संपन्ना। त्रयस्त्रिंशदंगुलानि
सप्तयवाः। ततस्त्रयो यूकाः द्वे लिक्षे। किंचिन्न्यूनबालाग्राणि। नेश्वतुस्त्रिंशा त्तिलाअंगुलाव
यवाः। किं बहुना भवंति। तावतालि लद्वयोना निचतुस्त्रिंशदंगुलानि द्विहस्तकरणीत्यर्थः। स
विशेषो ज्ञेयः कः करणी द्विकरतयाः। इति विशेषो द्विकरणी साधकं प्रकारान्तरमित्यर्थः। ए
वं द्विकरणीं प्रोच्य त्रिकरणीसाधनमाह। प्रमाणं ति यद्द्विकरण्या यमितस्तस्या हस्तायारज्जु
स्त्रिकरणी। प्रमाणं त्रिकरणी कर्तुमिष्टं स्यात्तस्य करणीरूपं तिर्यक् प्रसार्य। तिर्यक् प्रमाणं कि
र्त्तव्या। द्विकरणीमेवमुक्तां द्विकरणीमानं एकहस्तस्या दैर्घ्यारूपं आयामः पूर्वपश्चिमायतं तथा दीर्घमा
नीत्येन प्रसार्य। एवं कृते त्रिकोणे दीर्घचतुरस्रे वा कृते तस्य द्वे त्रस्या हस्तयारज्जुं कर्णसूत्ररूपा
त्रिकरणी भवति। हस्तमात्राणि त्रीणि चतुरस्राणि संक्षिपतीत्यर्थः। यथा हस्तमाना तिर्यग्मानी।
किं द्विहस्तचतुस्त्रिंशदंगुलमितायामदीर्घमानी। तयो रज्जुं प्रापिता कर्णरज्जुः त्रिकरणी। त्रिहस्तदेव
स्य करणी साधिका। तया साधितं समचतुरस्रं त्रिहस्तं भवतीत्यर्थः। त्रिकरणीकथने स्यात्

याऽऽनमाह। तृतीयकरणेतेन व्याख्याता। एतेन त्रिकरणीकथनेन तृतीयकरण्यपि व्याख्याता।
प्रक्रमतृतीयेनाष्टचैनेति सैत्रामण्यामुक्तं। तत्र प्रक्रमस्य तृतीयो भागः प्रक्रमतृतीयं भवति। किं
तेयाकरणी प्रक्रमच्छेदतृतीयांशं समचतुरस्रं कुर्वीतेति सा प्रक्रमतृतीयशब्देनोच्यते। सैव तृतीयक
रणी। वितृतीयेयजेत वितृतीयं वै सौमस्य सौत्रामणीति श्रूयते। तत्र तृतीयकरण्या प्रक्रमत्वेनक
ल्पितया वेदि[redacted]मणमते सा सौमवेदेस्तृतीयांशरूपा स्यात् एवं त्रिकरणीकथनेनेत्यर्थः। तृ
तीयकरणी व्याख्यातेति स्पष्टयितुमाह। प्रमाणविभागस्तेन नवधा। प्रमाणस्य प्रक्रमरूपस्य विभा
१ गोऽभिनजननं नवधा विधेयं। द्वादशांगुलं पदं। त्रिपदः प्रक्रमः। प्रक्रममितया रज्ज्वा क्षेत्रं चतुरस्री
कृत्य तत्र तिर्यग्भान्यौ पार्श्वमान्यौ च त्रेधा विभज्य पूर्वापरयोरन्तं दक्षिणोत्तरा यतं च सूत्रद्वयं दद्या
त्। एवं नवधा भागो भवति। एकैको भागः पदपदक्षेत्रफलकः स्यात्। करणीतृतीयं नव भागः। ॥ ए ॥
करण्याः प्रक्रमरूपायास्तृतीयं तृतीयो भागः पदरूपः करणीभूय चतुरस्रं कुर्वन् नवभा
गो भवति। नवमं भागं पदं संक्षिपतीत्यर्थः। नवभागास्तु यस्तृतीयकरणी। प्रक्रमरूपकरणीकृ
तस्य समचतुरस्रस्य ये त्रयो नव भागाः स तृतीयकरणी। तावेवं कार्या। पदमितया करण्यास

मचतुरस्रं कृत्वा तत्करण्या त्रिपदं द्विकरणीरूपं पार्श्वमानीं कृत्वा पदमितकरणीमेव तिर्यङ्मानीं वि
धाय तन्मध्यादौ चतुरस्रे कृते तत्करणी त्रिकरणी स्यात् तृतीयकरणी सा च करणी तृतीय[illegible]यसमचतुरस्रं
कुर्यात् त्रयो नवभागाः संपद्यन्ते। एवं तृतीयकरण्यपि तेन व्याख्याता इति प्रतिज्ञातं संप्रपंचं सूत्र
त्रयेण निरूप्य तृतीयकरण्याः प्रयोजनं सूत्रद्वयेनाह। सौत्रामण्यां प्रक्रमार्थी। सौत्रामण्यां सौ
त्रामणीयाजे प्रक्रमार्थी। प्रक्रमकथनाय तृतीयकरण्युक्तेति शेषः। सौत्रामण्यां तृतीयकरणीरू
पप्रक्रमेण सोमवद्वेदिर्मिता सती सौमिकीवेदेः तृतीयांशरूपा स्यात्। त्रिकरणी समासार्थी। त्रिकर
णी तृतीयकरणी च कथिता सा समासार्थी। त्रयाणां प्रक्रमनवभागानां संक्षेपार्थी। विनानेन नव
भागत्रयस्य संक्षेपमशक्यत्वात्। अतः प्रक्रमनवभागत्रयमेव सौत्रामण्यां प्रक्रम इत्यर्थः॥
उक्तं चतुरस्रसमासं निगमयति। तुल्यप्रमाणानां चतुरस्राणामुक्तः समासः। तुल्यं प्रमाणं ये
षां तानि तुल्यप्रमाणानि। हस्तादिरूपाणि। तादृशानां समचतुरस्राणां समासः संक्षेपः एकी
करणमुक्तं। दशकरणीवत्वा विंशत्करण्यादिकथनेन। अतुल्यप्रमाणानां समचतुरस्राणां
समासमाह। नानाप्रमाणसमा[illegible]करण्या वर्षीयसो पक्षिं छिंद्यात् तस्या अक्ष्णयारज्जुः

त्रेसमस्यतीति समासः। नानाप्रमाणानां भिन्नप्रमाणानां समचतुरस्राणां समासे संक्षे
पकार्ये ह्रसीयसो ह्रस्वतरस्य समचतुरस्रस्याष्टांगुलादेः करण्या वर्षीयसो वृद्धतरस्य द्वा
दशांगुलादेः करणीपार्श्वमानीं तिर्यङ्मानीं वाऽपच्छिंद्यात्। ह्रस्वकरणीमानेन दीर्घकरणीको
णात् मितां। विकृष्य तिष्ठाऽवशिष्टं चतुरंगुलादिभागं अस्यात्। तस्य ह्रस्वकरणीमानेन छिन्नस्य
दीर्घक्षेत्रस्या दृता माकर्णसूत्रं रज्जुः करणी सा यान्य चतुरस्रं कुर्वतीति ते ह्रसीयसो वृद्धत
रे क्षेत्रे समस्यतीति संक्षिपति। इति समासोऽतुल्यप्रमाणसमचतुरस्रसंक्षेपप्रकारः। य
था द्वादशांगुलकरणीकमेकं चतुरस्रं। तत्राष्टांगुलकरणीकं समस्सितव्यं। तत्र द्वादशांगुल
करण्याः कोणादारभ्याष्टांगुलेषु चिह्नं कुर्यात्। चतुरंगुलानि त्यक्त्वा विकृष्टादारभ्याभिमु ॥१०॥
खकोणांतं कर्णसूत्रं दत्वा तन्मितकरण्या यत् चतुरस्रं तत् क्रियते। तत्र ह्रस्वमहतोः क्षे
त्रयोः समासः स्यात्। एवमन्ययोरपि ह्रस्वमहतोः क्षेत्रयोः समासश्च कार्यो बोध्यः॥२॥
इति चौब्बे विवरणे महीधरविनिर्मिता चतुरस्रादिकथनं द्वितीयाकंडिका गमत्।

एवं ह्रस्वमहतोः क्षेत्रयोः समासं निरूप्य तयोरेव व्यासं निरूपयितुमाह। चतुरस्राच्चतु-
रस्रं निर्जिहीर्षन्यावन्निर्जिहीर्षेत्तावदुद्धृत्य ततो पश्चिमां शंकुं निखाय पार्श्वमानीं कृत्वा पार्श्व-
मानीसंमितामक्ष्णयायां ततो उपसंहरति स समासे ऽपच्छेदः। साकरण्योपि निर्ह्रासः। चतुरस्रान्म-
सम४ हतः चतुरस्रात् चतुरस्रं ह्रस्वं समचतुरस्रं निर्जिहीर्षन् निर्हर्तुमिच्छन् यावान्निर्जिहीर्षेत्
यत्प्रमाणं ह्रस्वसमचतुरस्रं निर्हर्तुं पृथक्कर्तुमिच्छति। तावत् तत्प्रमाणां करणीमुद्धृत्य ततो
पश्चिमायां महतश्चतुरस्रपार्श्वमान्यां पश्चिमप्रोतितं आरभ्यांकयित्वा। शंकुं निखा-
य। तस्मिन् ह्रस्वयेद्वौ शंकू रज्जुप्रसारणार्थं निखाय प्रक्षिप्य पार्श्वमानीकृत्वा तच्छंकुद्वयप्र-
सारितां महतश्चतुरस्रकरणीकृतां रज्जुं पार्श्वमानीत्वेन परिकल्प्य पार्श्वमानीसंमितां मा-
मेव रज्जुमक्ष्णयायां कर्णसूत्रं तत्राधस्तिर्यङ्मान्यां उपसंहरति प्रसारयति। एकतरस्मिं-
कोरज्जुपाशं निक्षिप्य तां रज्जुं तिर्यङ्मान्यामधः कर्णसूत्रत्वेन प्रसारयति। स समासे
ऽपच्छेदः। समासे क्षेत्रद्वयैक्यं कृते समस्तिसः अपच्छेदः। त्याज्यांशः। तस्यां रज्जौ तिर्यङ्मानी

स्पष्टा यां त्रिकोणे जाते त्रिकोणबहिर्भूतो यो महाचतुरस्रतिर्यग्भागः सोऽपच्छेद्यः त्यक्त-
व्यः । सा करणी । त्रिकोणान्तःपाती तिर्यग्भानीभागः करणी । तया करण्या कृतमन्यच्चतुरस्रं क्षे-
त्रं महतः पृथक्कृते शेषक्षेत्रं च भवतीत्यर्थः । एवं निकृसिः । महच्चेत्रक्षुद्रस्य पृथक्करणोपा-
यः । यथा पंचविंशतिहस्तफलकात् नवहस्तसमचतुरस्रान्नवहस्तक्षेत्रफलकं त्रिहस्तसम-
चतुरस्रं पृथक्क्रियते । तदा पंचहस्तक्षेत्रे श्रोणिद्वयाद्धस्तत्रयं मित्वा पार्श्वमानस्थे रेखाद्वयं
कृत्वा तत्र शंकुद्वयं निखाय तन्मितां रज्जुं कृत्वैकतरशंकौ रज्जुं धृत्वाऽधस्तिर्यग्भान्यां प्रस-
र्पयन् यत्र पतति तत्र चिह्नं कुर्यात् । तत्र पंचहस्तकर्णं त्रिहस्तपार्श्वमानीकं चतुर्हस्ततिर्यग्भानी-
कं त्रिकोणं स्यात् । तिर्यग्भान्यां त्रिकोणबहिर्भूतो यो हस्तमितभागः स त्याज्यः । शेषहस्त-
चतुष्टयमितकरण्या कृते षोडशहस्तक्षेत्रफलकं समचतुरस्रं स्यात् । एवं त्रिहस्ते पृथक्कृ- ॥११॥
तं भवति । पंचविंशतेः सकाशान्नवानां पृथक्करणे षोडशैवशिष्यन्ते । पार्श्वमानीतिर्यग्भा-
नीवर्गद्वये कामूलस्य कर्णरूपत्वात् । करणीवर्गस्य समचतुरस्रक्षेत्रफलरूपत्वात् ॥

रस्तानौ दीर्घचतुरस्रस्य समचतुरस्रीकरणोपायमाह। दीर्घचतुरस्रं समचतुरस्रं
चिकीर्षन्मध्ये तिर्यगपच्छिद्यान्यतरच्छिन्नमपि तत्पुरस्ताद्दक्षिणत श्रोणिपदपार्श्वे घमागं
तुनापूरयेत्तस्याकोणो निर्ह्रासः। दीर्घचतुरस्रं विस्तारद्विगुणायामं चतुरस्रं समच
तुरस्रं चिकीर्षन् कर्त्तुमिच्छन् मध्ये विस्तृतितुल्ये शे तिर्यक्रज्जुं प्रसार्यापच्छिद्य च्छि
न्नमन्यतरत् अर्द्धेपि तमम् [illegible] वा समचतुरस्रं च्छिन्नमपि पूर्वापररज्जा भागद्व
यं कृत्वा तत् भागद्वयं पुरस्ताद्दक्षिणत श्रोणिपदपार्श्वात्। एकं भागं दीर्घचतुरस्रल
ग्नं पूर्ववत् विनश्य समचतुरस्रे क्रियमाणे न्यूनभागे यत्कोणगतमष्टमांशं अ
जंतुना अध्याहृतेनाष्टमांशेन पूरयेत्। नन्वेवं समचतुरस्रं अधिकं जातमष्टमां
शस्याध्याहृतत्वादत आह। तस्याकोणो निर्ह्रासः। तस्याजंतोरंशस्य निर्ह्रासः भागः

कार्यः। सचत्यागप्रकारस्तूक्तः। चतुरस्राच्चतुरस्रं चिकीर्षन्हार्वचन्निति सूत्रे। एवं वि
स्तारद्विगुणायामस्य दीर्घचतुरस्रस्य समत्वोपायमुक्त्वेदानीं विस्ता
रद्विगुणाधिकायामस्य दीर्घचतुरस्रस्य समचतुरस्रत्वमाह। अतिदीर्घे
चेत्तिर्यङ्मान्यापच्छिद्यापच्छिद्यैकसमासेन समस्य शेषं यथायोगमुपसंह
12 रेदित्येकसमासः। अतिदीर्घे विस्तारद्विगुणाधिकायामे चेद्दीर्घचतुरस्रं भ
वति तदा तिर्यङ्मानया दक्षिणोत्तररज्ज्वापच्छिद्यापच्छिद्य पुनःपुनश्छित्वा एकस
मासेन नानाप्रमाणसमासविधिना समस्य संयोज्य शेषमुर्वरितमपि यथा
योगं यथायुज्यते तथोक्तविधिनोपसंहरेत् संयोजयेत्। इत्येकसमासः। एक ॥१२॥
समचतुरस्रीकरणोपायः। एकसमासेन समस्येति वक्ष्यमाणत्वाद्दिदे सेतावा

घनं । समचतुरस्रस्य दीर्घचतुरस्रत्वमाह । समचतुरस्रं दीर्घचतुरस्रं चि
कीर्षन्नच्छेदेन याम्यपश्चिमविभज्योत्तरचतुरस्रात् पुनरन्तश्रोपदध्याद्धि
तानं वे यथायोगमुपसंहरेदिति व्यासः । समचतुरस्रं दीर्घचतुरस्रं चि
कीर्षन् विस्तारद्विगुणायामं कर्तुमिच्छन् मध्ये छेदेन याम्यपश्चिम विभ
ज्य पश्चिमेकांशं पुनर्विभज्य नैरृतकोणाद्दक्षिणयाईं यावत् भागद्व
यं कृत्वा उत्तरत्रैकं भागं चतुर्थांशरूपं मध्यस्य पूर्वस्यां योजयेत् ।
अन्यं तूत्तरस्यां मध्यस्य योजयेत् । तथा सति द्विकोणां विस्तारद्विगु
णायामं दीर्घचतुरस्रं स्यात् । क्षेत्रज्ञानमेवास्य प्रयोजनं । विषमं चतु
रस्रं चेत्तन्नवति । तद्यदि विस्तारद्विगुणायतदीर्घचतुरस्रं क्रियेत तदा
तत्र यथायोगमुपसंहरेत् । युक्त्यनुसारेण पूर्वोक्तैकसमासयुक्त्योप
संहरेत् । समस्यत् । समस्य समचतुरस्रं कृत्वा ततस्तत्कयुक्त्या दीर्घच
तुरस्रं कुर्यात् । इति व्याख्या विस्तारः । समचतुरस्रस्य दीर्घचतुरस्रत्वेन प्र

स्वारस्यार्थः। नियमविशेषमाह। प्रमाणं वस्तुरस्त्वं मादेशाद्न्यत। प्रमा
णेव कल्पये-ऽनादेशो वस्तुरस्त्वं समवस्तुरस्त्वमेव प्रमाणं व्याप्य। द्वि स्पदो।
ऽपादे शोल्लु प्रमाणा विशेष कथनेनतु अन्यत यत्र यदुक्तं तत्र तदेव मेऽस्या
दिकं ग्राह्यं ग्राह्यमिलावित्यादिवत्। दैर्घ्यफलं वक्तुमुपक्रमते। द्वित्रमाणा
वस्तुः षट्करणी त्रिप्रमाणानवक करणी वस्तुः प्रमाणा चतुराकरणी। द्विप्र
माणाकरणी द्विहस्त प्रमाणाकरणीकृतं समवस्तुरस्त्वे वस्तुः। वस्तुर्हस्तान्दै
र्घ्यफलकं स्यात्। एवं त्रि प्रमाणाकरणीकृतं नवहस्तदैर्घ्यफलकं वक्तुं प्रमा
णाकरणी वस्तुर्हस्त करणी तत्रस्त समवस्तुरस्त्वं ... शहस्त फलकं भ
वति। किंबहुना दैर्घ्यफलज्ञानायैवं विधेयमित्याह। यावत्प्रमाणा रज्जु ॥१३॥
र्भवति तावंतस्तावतो वर्गा भवंति तान् समस्येत्। यावत्प्रमाणा षट् सप्तह
स्तादिमिता रज्जुर्भवति तावंतस्तावंतस्तत्प्रमाणा वर्गा भवं ×पंच+ तितन्दै
र्घ्यफलस्तु पादृस्यार्थः। सा द्विरा त्रिगुणानं वर्गः। यथा पंच हस्तं दैर्घ्यं पंचवि

चातिहतात्क्षेत्रफलकमेवमन्येपि षड्भुजादौ बोध्यं। तान्समस्यपतन्ते षांवर्गणां समा
संकुर्यात्। नानाप्रमाणविधिनापुरोक्तेनेत्यर्थः॥ नन्वत्र क्षेत्रस्य विशेषमाह। अर्द्धव
मात्रेण पादप्रमाणं विधीयते। करण्याय स्पा अर्द्धमानरज्ज्वा समचतुरस्रं क्रियते।
तत्र पादप्रमाणं विधीयते। तत्करणी चतुर्थांशः संपद्यते। यत्करण्या अर्द्धकृतं तत्क्षे
त्रफलचतुर्थांशफलकं तत्क्षेत्रं भवतीत्यर्थः। यथा करणी २४ तदर्द्धं १२ तत्कृतं चतुरस्रं
भुजकोटिघातेन १४४ एतत्फलकं जातं। एतत् २४ करणी चतुरस्रफलस्य ५७६
एतावतश्चतुर्थांशः। एवमन्यत्रापि। तृतीयेन नवमांशः। करण्यास्तृतीयांशामि
तरज्ज्वाकृते न समचतुरस्रेण नवमांशो [illegible]ते। तत्करणी नवमो भागः संपद्य

ते। चतुर्थेन षोडशी कला। यत्करणी चतुर्थांशमित रज्ज्वा समचतुरस्रं क्रियते तेन षोड
शी कला षोडशांशः। [illegible] संक्षिप्यते। एष निर्ह्रासस्तस्य पुरस्तादुक्तं चा
स्त्रे। एव पूर्वोक्तः अर्द्धप्रमाणेनेत्यादिना चतुर्थ नवम षोडशांशानां निर्ह्रासोम
हतः क्षेत्रात्पृथक्करणं। स च कथं विधेयद्वत्याशंकायां तस्य निर्ह्रासस्य शास्त्रे त्रिधा
प्रकारः पुरस्तात्पूर्वमुक्तं। चतुरस्राच्चतुरस्रं निर्जिहीर्षन्नित्यत्र। यावत्प्रमाणा र
14 ज्जुर्भवतीति विकल्पद्वैर्ह्रासो भवति। अर्द्धप्रमाणेन पादप्रमाणमित्यादिना यः द्वे
ह्रा त्रस्यैसः समासेन कः। सकृत्स्पष्टास इत्यपेक्षायां यावत्प्रमाणा रज्जुर्भवति ताव ॥१४॥
तस्तावन्तो वर्गा भवन्तीति सूत्रेणायात्येन फलरूपा वृद्धिरुक्ता। तस्यापि विवृद्धेर्यं

ह्रासो भवति । यथा करणी चतुर्थांशोन चतुरस्रे कृते करण्याः षोडशांशस्य समास
इत्यादि । चतुरस्रस्य मण्डलीकरणमाह । चतुरस्रं मण्डलं चिकीर्षन् मध्यात् कोणे निपात्य पार्श्वतः
परिलिख्य तत्र यदतिशिष्टं भवति तस्य तृतीयेन सह मण्डलं परिलिखेत् स समाधिः । चतुर
स्रं सम चतुरस्रं मण्डलं वर्तुलं कर्त्तुमिच्छन् । मध्यादंसे निपात्य । चतुरस्रमध्यमानात्तु अंसे
एकस्मिन् रज्जुं दत्वा । चतुरस्रे कर्णसूत्रद्वये दत्ते सूत्रयोः संयोगस्थलं मध्यमिति बो
५६ ध्यं । पार्श्वतः मध्यादारभ्य पर्यन्तं करणीयं तन्मानेन परिलिख्य । मध्यादारभ्यांसां
ते पातितं कर्णसूत्रार्द्धमेकपिंत्वा तत्र कर्णसूत्रार्द्धे यदतिरिक्तं षोडशांशकं नाद[illegible] कोणा
गो भवति । तं चैकत्रिधा विभज्य तस्य त्रिशिष्टस्य तृतीयेनांशेन सह करणार्द्धं संवद्ध्य तन्माने
न [illegible] व्यासार्द्धेन मण्डलं परिलिखेत् कुर्यात् । स समाधिः । मण्डलीकरणविधिरित्यर्थः ।
चतुरस्रमध्यादंसे सूत्रं निपात्य पार्श्वे एकत्र तेन दत्तसूत्रार्द्धमानेन परिलिख्य सूत्रे दत्वा तत्र
यदतिरिक्तं करणार्द्धे [illegible] चिह्नं च तस्य तृतीयांशेन सहितं करणार्द्धेन
इति मण्डलं कुर्यात् । ऽत्र यथा पितावदेवायातीत्यर्थः

15

नष्टं तं च चतुरस्रतुल्यक्षेत्रफलकं न वर्त्ति[illegible]। यथा षोडशांगुलस्य चतु

रस्रस्य मध्यादं सां तं कर्णसूत्रमेकादशांगुलं न वतितत्र पार्श्वमानाष्टांगु

लैः श्रि हेकृते चौथमं गुलत्रयं। तच्छ्रुती यो भागोऽगुलं। तत्सहिताष्टांगुलमाने

न नवांगुलरज्जामं [illegible] भ्राद्यते कृते ऽष्टादशांगुलं वृत्तं षोडशांगुलचतु

रस्रतुल्यक्षेत्रफलं स्यादिति॥ मंडलस्य चतुरस्रीकरणमाह।

मंडलं चतुरस्रं वि कीर्षन् विष्कंभं पंचदशान् भागान् कृत्वा द्वावुद् ॥१५॥

रेखैः पंक्तिकरणी॥ वृत्तक्षेत्रे चतुरस्रं कर्त्तुकामो विष्कंभं वृत्तव्या

सं पंचदशभागान् कृत्वा पंचदशभागानं त्वा द्वौ भागौ उद्धरेत्यजेत्। शेषस्त्र

योदशभागरूपः करणी [illegible] समचतुरस्रं वृत्ततुल्यक्षेत्रफ

का

जं स्यात्। इदं स्थूलमानेनोक्तं। सूक्ष्मं तु अष्टादशानां गान्धर्वाचार्यैर्द्रष्टव्यमेतत्। तदु
क्तं वार्त्तिके। वृत्तव्याससमं वांशं वा परिहृत्याथ तांश्च देत्। कर्तरी वक्तुर स्वार्थमञ्ज
मेवान्तरं भवेत् इति। इति योऽवैविवरणे महीधर विनिर्मितं। सर्व्वस्थिव्यासक
थनं तृतीयाकं डिकागता। ३॥ एवं तु रस्त्वादिद्वेत्रा णि निरूप्याग्निचितीर्निरूप
यितुं तन्नामान्याह। द्रोणचित्कं रथचक्रचित्कंक चित्प्रउगचित् उभयतः प्रउगः समुह्य
पुरीष इत्येते नयः। इति षट् अग्नयः। अग्नि प्रणयनाधारभूता चितयइत्यर्थः
शतपथे सूचिता अन्यत्र चवि चताः अत्र तु द्वेत्र समासार्थमुक्ताः। द्रोणः समचतु
रस्रं। तदाकारा चितिर्द्रोणचित्। रथस्य चक्रं वृत्तं तदाकारा चिती रथचक्रचित्
कंकोबको गगनगः उड्डीयमानः। तदाकारा चितिः कंकचित्। ३ प्रउगं त्रिकोणं र
थाग्रं तदाकारा चितिः प्रउगचित्। ४ उभयतस्तदाकारा मध्यस्थूला चितिरुभ
यतः प्रउगः। ५ समुह्य मध्यतश्चानेयं पुरीषं मृत्तिकाय त्र समुह्य पुरीष इति चितिः। ६॥

एवमग्नीनुद्दिश्य क्रमेणाते षां क्षेत्रसमासमाह। द्रोणे यावानग्निः सपक्षपुच्छविशो
षस्तावच्चतुरस्रं कृत्वा द्रोणस्याविनाशो यं तमित्येके। आचार्यास्त्विदं लि। यत्। द्रोणे
द्रोणचितौ स[illegible]पक्षपुच्छविशेषः। पक्षौ च पुच्छं च पक्षपुच्छं तदेव विशेषस्तत्सहितो या
वानग्निर्यावदग्निक्षेत्रं सार्द्धसप्तपुरुषादि। तावत्समचतुरस्रं कृत्वा नानाप्रमाणसमा
सविधिना पक्षौ पुच्छं च समस्य समचतुरस्रं कृत्वा द्रोणस्य दशमो भागो यं तं। यं ता
कारं स्वल्पचतुरस्रं योजनीयमिति। तद्योजनविधिमाह। तद्दशमेनापच्छिद्यापचि
द्यैकसमासेन समस्य निहृत्य सर्वमग्निं तथाकृतिं कृत्वा पुरस्तात्पश्चाद्वोपदध्यात्। ॥१६॥
तत्पूर्वोक्तं समचतुरस्रं तस्य दशमांशेन तिर्यगूर्ध्वं च दशधा भंक्त्वा यावान् शीकृ
त्यदशांशरूपेण दशमभागेनापच्छिद्यापचि[illegible]द्याति दीर्घं वेदितुस्तु नैक समास
विधिना समस्य एकीकृत्य तं दशमांशं निहृत्य पृथक्कृत्य शिष्टं सर्वम[illegible]ग्निं तथा

श्री ताकारं।

कृतिं कृत्वा निर्हृति दक्षामां शंपुरस्तात्पश्चाद्वो पक्षध्याह्नं तत्वेन योजयेत्। मंडले प्ये
वं। मंडलेष्वत्तेरथचक्रचितौ कंकचितावप्येवमेव। पूर्ववित्पक्षपुच्छ समासेन चतुरस्रं
कृत्वा तद्दक्षामां शमपक्षत्पवंतुरस्रंमंडलं पूर्वोक्तविधिना कृत्वावं तमपिवत्तं वि
धाय पुरःपश्चाद्वायोजयेदित्यर्थः। प्रउगचितिमाह। प्रउगे यावानग्निः सपक्षपु
च्छविशेषस्तावद्द्विगुणं सम चतुरस्रं कृत्वाय पुरस्तात्करणीमध्ये शंकुर्येचित्रोत्याः सोऽग्निः। प्रउगं त्रिको
णचितौ पक्षपुच्छसहितो यावानग्निस्तावच्चतुरस्रं कृत्वा तत्पुनर्द्विकरण्या द्विगुणीकृत्य द्विकरणीरूपकरण्यास
मचतुरस्रे पुनर्विधाय पूर्वत्रतिर्यङ्मानीमध्ये पः शंकुः श्रोत्याश्च यो द्वौ शंकू तत्रस्थत्रत्रयेदत्ते द्विगुणीकृता
ई यत्त्रिकोणं जातं सा प्रउगचितिः। नन्वयतः प्रउगचितिमाह। नन्वयतः प्रउगे तावदेव दीर्घचतुरस्रं कृत्वा क
रणीमध्ये पुरः शंकवः सः समाप्तिः। उन्नयतः प्रउगे तसं द्विकचितौ सपक्षपुच्छे चतुरस्रं कृत्वा तावदेव पुरस्ता
द्वर्धयित्वा। विस्तारद्विगुणायामे दीर्घ चतुरस्रं विधाय करणीनां वतस्रणां मध्यभागेषु चत्वारः शंक

वद्धंर

वोदयाः। तत्रस्थत्रचतुष्कैस्तेतन्नयतस्त्रिकोणाकारा चितिर्भवति। समसमाप्तिश्चितिप्रकारः। प्रउगस्य च
तुरस्त्रीकरणोपायमाह। प्रउगं चतुरस्रं त्रिकोणं मध्ये पावं कृपलक्षयेविनच्छैकं भागं विपर्यस्य [redacted]
विपर्यस्येत्तरत्र पश्चाद्दीर्घचतुरस्रसमासेन समस्य समसमाप्तिः। प्रउगं त्रिको
णं चतुरस्रं समचतुरस्रं कर्तुमिच्छन् मध्ये त्रिकोणमध्ये आवं रवंभागं

= १ का ३ ५

विपरीतं पश्चिममुखं त्रिकोणं कृत्वा इतरतः द्वितीयभागरूपे त्रिकोणेन पश्चायसंयोज्य दीर्घचतुरस्रे जाते दीर्घचतुरस्रे जाते दी
र्घचतुरस्रसमासेन दीर्घचतुरस्रं समचतुरस्रं चिकीर्ष त्रिस्याद्युक्तविधिना समस्येत्। समचतुरस्रं कुर्यात्।
ससमाधिः। त्रिकोणस्य समचतुरस्रत्व विधिः। एवमेककर्णसमासस्तु क्तः। अन्यतः प्रउगं वेन मध्ये
तिर्यक्प [redacted] श्चि पूर्ववत् समस्येत्। अन्यतस्त्रिकोणं चेत्समचतुरस्रं कर्तुमिच्छति तदा मध्येसूत्र
स्य भागे तिर्यक्पश्चिमं विन्यस्य पूर्ववत् समस्येत्। मध्ये प्रागवमपश्चि घेत्याद्युक्तविधिना दीर्घच
तुरस्रं विधाय पुनरुक्तप्रकारेण समचतुरस्रं कुर्यात्। इतिकर्णद्वयसमासः। एतेनैव त्रि
कर्णसमासो व्याख्यातः। एतेनैव प्रकारेण अत्रिद्वयसमासकथनेन त्रिकर्णसमासः।
त्रिकर्णानां त्रयाणां अस्त्रीणां समासएकीकरणं व्याख्यातं कथितं। एकैकं दीर्घचतुरस्रं
विधाय तत्तदुक्तविधिना समस्येत् इत्यर्थः। पंचकर्णानां च। पंचकर्णानां पंचानां अस्त्रीणां
च समासः एतेनैव प्रकारेण व्याख्यातः। अन्यतः प्रउग विधिना द्वे द्वे समस्य चतुर्षु समच ॥१७॥
तुरस्रीकृतेषु [redacted] पंचमं चतुरस्रीकृत्य नाना प्रमाणसमास विधिना मध्ये क्षिपेदि
त्यर्थः। प्रउगे पश्चिमे एककर्णानां। एककर्णानां तुल्यकर्णानां पंच अस्त्रीणां मध्ये यथा
१५ प्रउगे [redacted] पश्चिमे यो नां [redacted] करणीसमासकार्यं विचार्य नां चसमचतुरस्रं पश्चिमे च। द्विकर्णानां
१ नानाविधकर्णानां पं [redacted] अस्त्रीणां १५

योगमेकैकविधकर्तं त्रद्वयं समचतुरस्रीकृत्य फलस्य करण्या वृद्धकरणी मप
चनानाप्रमाणेत्पुरुषविधिना समासः कार्यः। इति श्रीशुल्बे विवरणे महीधरविनिर्मिते। समाससकथननाम
चतुर्थी कंडिका गमता॥ श्रीगणेशाय नमः। चयने द्विपुरुषाद्यैरज्जुमित्वौ न यतः पाशांमध्ये लक्षणमित्या
दिसूत्रैः प्रथमाग्निर्देहे त्रयोविंशोनं कल्प एवोक्तः। स सप्तविध इत्युच्यते। इदानीमष्टविधादिर्ग्निर्देहेषु पुरु
षाभ्युच्चयं वक्तुं प्रतिजानीते। उत्तरेषु पुरुषाभ्युच्चये नैकशतविधादित्येतद्वक्ष्यामः। उत्तरेषु पुरुषाभ्युच्चये नैकश
तविधादित्येतद्वक्ष्यामः। उत्तरेषु पुरुषाभ्युच्चये नैकशतविधादिति यत्कात्यायनेन कल्पे उक्तं। एतत् पुरुषाभ्युच्चय
विधानं वक्ष्यामः। कथयिष्यामः। उत्तरेष्विति कल्पसूत्रस्यायमर्थः। उत्तरेषु द्वितीयादिचयनेषु पुरुषाभ्युच्चये
न पुरुषाभ्युच्चयेन वृद्ध्या एकैकपुरुषवृद्ध्याऽग्निमानं भवति। कियत्पर्यंतमत आह। आ एकशतविधात्। एकश
तविधपुरुषपर्यंतं पंचनवतिः सार्द्धसप्तपुरुषक्षेत्रफलकः। सप्तविधः। द्वितीयोऽष्टविधः। तृतीयो नवविध
इत्याद्येकशतविधपुरुषपर्यंतं पंचनवतिः अश्वमेधे च द्वावन्यौ द्विगुणत्रिगुणसंज्ञौ वक्ष्यमाणौ। एवं सप्त
नवतिरग्निचयनभेदाः इत्यर्थः। एवं पुरुषाभ्युच्चयो यत्र कृतस्तं वक्ष्यामः। तत्रादावाश्वमेधिकं चयनद्वयमाह।
